# महात्मा-गाँधी-केन्द्रीय-विश्वविद्यालयः, बिहारः

## मानविकी एवं भाषासंकायः

## संस्कृतविभागः

एम. ए. द्वितीयसत्रम्

### विषयः- लघुसिद्धान्तकौमुदी

Code – SNKT2001

### उपविषयः- अजन्तनपुंसकलिङ्गप्रकरणम्

डॉ. श्याम कुमार झा
सह- आचार्यः, संस्कृतविभागः
महात्मा-गाँधी-केन्द्रीय-विश्वविद्यालयः

पदसाधनम्

अजन्तनपुंसकलिङ्गप्रकरणम् (लघुसिद्धान्तकौमुदी)

ज्ञानशब्दः

# प्रथमाविभक्तिः

## ज्ञानम्

ज्ञानशब्दात् 'अर्थवदधातुरप्रत्ययः प्रातिपदिकम्' इति सूत्रेण प्रातिपदिकसंज्ञायाम्
ज्ञान+सु 'स्वौजसमौट्छष्टाभ्याम्भिस्ङेभ्याम्भ्यस्ङसिभ्याम्भ्यस्ङसोसाम्ङ्योस्सुप्' इत्यनेन सूत्रेण प्रथमाविभक्ति-एकवचने सु प्रत्यये कृते
'स्वोमोर्नपुंसकात्' इति सूत्रेण सु प्रत्ययस्य लुकि कृते। अदन्तः अङ्गः अवशिष्टः भवति।
अजन्तत्वात् 'अतोऽम्' इत्यनेन सूत्रेण अमादेशे कृते
ज्ञान+अम् 'अमि पूर्वः' इति सूत्रेण पूर्वरूपैकादेशे कृते
ज्ञानम् पदसिद्धम्।

## ज्ञाने

ज्ञान+औ- 'स्वौजसमौट्छष्टाभ्याम्भिस्ङेभ्याम्भ्यस्ङसिभ्याम्भ्यस्ङसोसाम्ङ्योस्सुप्' इत्यनेन सूत्रेण प्रथमा द्विवचने औ प्रत्यये कृते
ज्ञान+शी 'नपुंसकाच्च' इत्यनेन सूत्रेण श्यादेशे कृते
ज्ञान+ई 'लशक्वतद्धिते' इति सूत्रेण शकारस्य इत्संज्ञायां 'तस्य लोपः' इत्यनेन लोपे
ज्ञान+ई 'यचि भम्' इति सूत्रेण भसंज्ञायां 'यस्येति च' इति सूत्रेण ज्ञान इति अकारस्य लोपे प्राप्ते
ज्ञान 'औङः श्यां प्रतिषेधो वाच्यः' इति वार्तिकेन यस्येति च इति लोपस्य प्रतिषेधे कृते
'आद् गुणः' इति सूत्रेण गुणादेशे कृते
ज्ञाने पदसिद्धम्।

## ज्ञानानि

ज्ञान+जस् ‘स्वौजसमौट्छष्टाभ्याम्भिस्ङेभ्याम्भ्यस्ङसिभ्याम्भ्यस्ङसोसाम्ङ्योस्सुप्’ इत्यनेन सूत्रेण प्रथमा बहुवचनविवक्षायां जस् प्रत्यये कृते
ज्ञान+शि ‘जश्शसोः शिः’ इति सूत्रेण शि आदेशे कृते
ज्ञान+इ ‘स्थानिवदादेशोऽनल्विधौ ‘इति स्थानिवद् कृते
‘लशक्वतद्धिते’ इति सूत्रेण शकारस्य इत् संज्ञायां ‘तस्य लोपः’ इत्यनेन लोपे
ज्ञानन्+इ ‘नपुंसकस्य झलचः’ इति सूत्रेण नुमागमे कृते
‘मिदचोऽन्त्यात्परः’ इति अन्तिम-अचः परेः नुमागमे कृते अनुबन्धलोपे च न् इति शेषे
ज्ञानान्+इ ‘सर्वनामस्थाने चासम्बुद्धौ’ इति सूत्रेण उपधादीर्घे कृते
ज्ञानानि पदसिद्धम्।

## द्वितीयविभक्तिः

## ज्ञानम्

ज्ञान+अम् ‘स्वौजसमौट्छष्टाभ्याम्भिस्ङेभ्याम्भ्यस्ङसिभ्याम्भ्यस्ङसोसाम्ङ्योस्सुप्’ इत्यनेन सूत्रेण प्रथमाद्विवचनविवक्षायाम् अम् प्रत्यये कृते
‘स्वमोर्नपुंसकात्’ इति सूत्रेण सु प्रत्ययस्य लुकि कृते। अदन्तः अङ्गः अवशिष्टः भवति। अजन्तत्वात् ‘अतोऽम्’ इत्यनेन सूत्रेण अमादेशे कृते
ज्ञान+अम् ‘अमि पूर्वः’ इति सूत्रेण पूर्वरूपैकादेशे कृते
ज्ञानम् पदसिद्धम्।

# ज्ञाने

| | |
|---|---|
| ज्ञान+औट् | 'स्वौजसमौट्छष्टाभ्याम्भिस्ङेभ्याम्भ्यस्ङसिभ्याम्भ्यस्ङसोसाम्ङ्योस्सुप्' इत्यनेन सूत्रेण प्रथमा द्विवचने औट् प्रत्यये कृते |
| ज्ञान+शी | 'नपुंसकाच्च' इत्यनेन सूत्रेण श्यादेशे कृते |
| ज्ञान+ई | 'लशक्वतद्धिते' इति सूत्रेण शकारस्य इत्संज्ञायां 'तस्य लोपः' इत्यनेन लोपे प्राप्ते |
| ज्ञान+ई | 'यचि भम्' इति सूत्रेण भसंज्ञायां 'यस्येति च' इति सूत्रेण ज्ञान इति अकारस्य लोपे प्राप्ते 'औङः श्यां प्रतिषेधो वाच्यः' इति वार्तिकेन 'यस्येति च' इत्यनेन लोपस्य प्रतिषेधे कृते 'आद् गुणः' इति सूत्रेण गुणादेशे कृते |
| ज्ञाने | पदसिद्धम्। |

# ज्ञानानि

| | |
|---|---|
| ज्ञान+शस् | 'स्वौजसमौट्छष्टाभ्याम्भिस्ङेभ्याम्भ्यस्ङसिभ्याम्भ्यस्ङसोसाम्ङ्योस्सुप्' इत्यनेन सूत्रेण प्रथमा बहुवचनविवक्षायां शस् प्रत्यये कृते |
| ज्ञान+शि | 'जश्शसोः शिः' इति सूत्रेण शि प्रत्यये कृते |
| ज्ञान+इ | 'स्थानिवदादेशनलविधौ' इति स्थानिवद् कृते 'लशक्वद्धिते' इति सूत्रेण शकारस्य इत् संज्ञायां 'तस्य लोपः' इत्यनेन लोपे |
| ज्ञानन्+इ | 'नपुंसकस्य झलचः' इति सूत्रेण नुमागमे कृते। मिदचोऽन्त्यात्परः इति अन्तिम-अचः परेः नुमागमे कृते अनुबन्धलोपे न्-कार इति शेषे |
| ज्ञानान्+इ | 'सर्वनामस्थाने चाऽसम्बुद्धौ' इति सूत्रेण उपधादीर्घे कृते |
| ज्ञानानि | पदसिद्धम्। |

# तृतीयाविभक्तिः

## ज्ञानेन

ज्ञान+टा ‘स्वौजसमौट्छष्टाभ्याम्भिस्ङेभ्याम्भ्यस्ङसिभ्याम्भ्यस्ङसोसाम्ङ्योस्सुप्’ इत्यनेन सूत्रेण तृतीया एकवचनविवक्षायां टाप्रत्ययः

ज्ञान+इन ‘टाङसिङसामिनात्स्याः’ इत्यनेन टा इत्यस्य इन इति आदेशे ‘आद् गुणः’ इत्यनेन गुणैकादेशे

ज्ञानेन पदसिद्धम्

## ज्ञानाभ्याम्

ज्ञान+भ्याम् ‘स्वौजसमौट्छष्टाभ्याम्भिस्ङेभ्याम्भ्यस्ङसिभ्याम्भ्यस्ङसोसाम्ङ्योस्सुप्’ इत्यनेन सूत्रेण तृतीयाद्विवचनविवक्षायां भ्याम् प्रत्ययः ‘सुपि च’ इत्यनेन अकारस्य दीर्घादेशे कृते

ज्ञानाभ्याम् पदसिद्धम्।

## ज्ञानैः

ज्ञान+भिस् ‘स्वौजसमौट्छष्टाभ्याम्भिस्ङेभ्याम्भ्यस्ङसिभ्याम्भ्यस्ङसोसाम्ङ्योस्सुप्’ इत्यनेन सूत्रेण तृतीया बहुवचनविवक्षायां भिस् प्रत्ययः

ज्ञान+ऐस् ‘अतो भिस् ऐस्’ इत्यनेन भिस् स्थाने ऐस् इति आदेशे

ज्ञानै+स् ‘वृद्धिरेचि’ इत्यनेन वृद्धिः

ज्ञानै+रु ‘ससजुषो रुः’ इत्यनेन सकारस्य स्थाने रु इति आदेशे

ज्ञानै+र् ‘उपदेशेऽजनुनासिक इत्’ इत्यनेन उकारस्य इत्संज्ञायां ‘तस्य लोपः’ इत्यनेन लोपे

ज्ञानै+र् ‘विरामोऽवसानम्’ इत्यनेन अवसानसंज्ञायाम्

‘खरवसानयोर्विसर्जनीयः’ इत्यनेन विसर्गादेशे कृते।

ज्ञानैः पदसिद्धम्।

## चतुर्थीविभक्तिः

## ज्ञानाय

ज्ञान+ङे ‘स्वौजसमौट्छष्टाभ्याम्भिस्ङेभ्याम्भ्यस्ङसिभ्याम्भ्यस्ङसोसाम्ङ्योस्सुप्’ इत्यनेन सूत्रेण चतुर्थी-एकवचनविवक्षायां ङे प्रत्ययः

ज्ञान+य ‘ङेर्यः’ इत्यनेन ङे स्थाने य इति आदेशे

‘सुपि च’ इत्यनेन नकारोत्तरवर्तिनः अकारस्य दीर्घादेशे कृते

ज्ञानाय पदसिद्धम्।

## ज्ञानाभ्याम्

ज्ञान+भ्याम् ‘स्वौजसमौट्छष्टाभ्याम्भिस्ङेभ्याम्भ्यस्ङसिभ्याम्भ्यस्ङसोसाम्ङ्योस्सुप्’ इत्यनेन सूत्रेण तृतीयाद्विवचनविवक्षायां भ्याम् प्रत्ययः

‘सुपि च’ इत्यनेन अकारस्य दीर्घादेशे कृते

ज्ञानाभ्याम् पदसिद्धम्।

## ज्ञानेभ्यः

ज्ञान+भ्यस् ‘स्वौजसमौट्छष्टाभ्याम्भिस्ङेभ्याम्भ्यस्ङसिभ्याम्भ्यस्ङसोसाम्ङ्योस्सुप्’ इत्यनेन चतुर्थीबहुवचनविवक्षायां भ्यस् प्रत्ययः

ज्ञाने+भ्यास् ‘बहुवचने झल्येत्’ इत्यनेन अकारस्य एकारादेशे कृते

ज्ञाने+भ्यरु ‘ससजुषो रुः’ इत्यनेन सकारस्य स्थाने रु इति आदेशे

ज्ञाने+भ्यर् ‘उपदेशेऽजनुनासिक् इत्’ इत्यनेन उकारस्य इत्संज्ञायां ‘तस्य लोपः’ इत्यनेन लोपः

‘विरामोऽवसानम्’ इति अवसानसंज्ञायां

‘खरवसानयोर्विसर्जनीयः’ इत्यनेन विसर्गादेशे

ज्ञानेभ्यः पदसिद्धम्।

# पञ्चमीविभक्तिः

## ज्ञानात्

ज्ञान+ङसि 'स्वौजसमौट्छष्टाभ्याम्भिस्ङेभ्याम्भ्यस्ङसिभ्याम्भ्यस्ङसोसाम्ङ्योस्सुप्' इत्यनेन सूत्रेण पञ्चम्येकवचनविवक्षायां ङसि प्रत्यये कृते

ज्ञान+आत् 'टाङसिङसामिनात्स्याः' इत्यनेन ङसि स्थाने आत् आदेशे
'अकः सवर्णे दीर्घः' इत्यनेन दीर्घादेशे कृते

ज्ञानात् पदसिद्धम्।

## ज्ञानाभ्याम्

ज्ञान+भ्याम् 'स्वौजसमौट्छष्टाभ्याम्भिस्ङेभ्याम्भ्यस्ङसिभ्याम्भ्यस्ङसोसाम्ङ्योस्सुप्' इत्यनेन सूत्रेण तृतीयाद्विवचनविवक्षायां भ्याम् प्रत्ययः
'सुपि च' इत्यनेन अकारस्य दीर्घादेशे कृते

ज्ञानाभ्याम् पदसिद्धम्।

# ज्ञानेभ्यः

ज्ञान+भ्यस् ‘स्वौजसमौट्छष्टाभ्याम्भिस्ङेभ्याम्भ्यस्ङसिभ्याम्भ्यस्ङसोसाम्ङ्योस्सुप्’ इत्यनेन
चतुर्थीबहुवचनविवक्षायां भ्यस् प्रत्ययः

ज्ञान+भ्यास् ‘बहुवचने झल्येत्’ इत्यनेन अकारस्य एकारादेशे कृते

ज्ञाने+भ्यरु ‘ससजुषो रुः’ इत्यनेन सकारस्य स्थाने रु इति आदेशे

ज्ञानेभ्यर् ‘उपदेशेऽजनुनासिक् इत्’ इत्यनेन उकारस्य इत् संज्ञायां ‘तस्य लोपः’ इत्यनेन लोपः
‘विरामोऽवसानम्’ इति अवसानसंज्ञायां
‘खरवसानयोर्विसर्जनीयः’ इत्यनेन विसर्गादेशे कृते

ज्ञानेभ्यः पदसिद्धम् ।

# षष्ठीविभक्तिः

## ज्ञानस्य

ज्ञान+ङस् ‘स्वौजसमौट्छष्टाभ्याम्भिस्ङेभ्याम्भ्यस्ङसिभ्याम्भ्यस्ङसोसाम्ङ्योस्सुप्’ इत्यनेन षष्ठी-एकवचनविवक्षायां ङस् प्रत्ययः

ज्ञान+स्य ‘टाङसिङसामिनात्स्याः’ इत्यनेन ङस् इत्यस्य स्थाने स्य आदेशे कृते

ज्ञानस्य पदसिद्धम्।

## ज्ञानयोः

ज्ञान+ओस् ‘स्वौजसमौट्छष्टाभ्याम्भिस्ङेभ्याम्भ्यस्ङसिभ्याम्भ्यस्ङसोसाम्ङ्योस्सुप्’ इत्यनेन सूत्रेण षष्ठीद्विवचविवक्षायाम् ओस् प्रत्ययः

ज्ञाने+ओस् ‘ओसि च’ इत्यनेन अकारस्य ए इति आदेशे

ज्ञानयोस् ‘एचोऽयवायावः’ इत्यनेन सूत्रेण अय् आदेशे

ज्ञानयोरु ‘ससजुषो रु’ इत्यनेन सकारस्य स्थाने रु इति आदेशे

ज्ञानयोर् ‘विरामोऽवसानम्’ इत्यनेन अवसानसंज्ञायाम् ‘खरवसानयोर्विसर्जनीयः’ इत्यनेन विसर्गादेशे कृते

ज्ञानयोः पदसिद्धम्।

## ज्ञानानाम्

ज्ञान+आम् ‘स्वौजसमौट्छष्टाभ्याम्भिस्ङेभ्याम्भ्यस्ङसिभ्याम्भ्यस्ङसोसाम्ङ्योस्सुप्’ इत्यनेन षष्ठीबहुवचनविवक्षायाम् आम् प्रत्ययः

ज्ञान+नुट्+आम् ‘ह्रस्वनद्यापो नुट्’ इत्यनेन आम् इत्यस्य नुट् इति आगमः

ज्ञान+न्+आम् ‘नुट्’ इत्यनुबन्धलोपो न् इति शेषे

‘नामि’ इत्यनेन अकारस्य दीर्घादेशे कृते

ज्ञानानाम् पदसिद्धम्।

### सप्तमीविभक्तिः

## ज्ञाने

ज्ञान्+ङि ‘स्वौजसमौट्छष्टाभ्याम्भिस्ङेभ्याम्भ्यस्ङसिभ्याम्भ्यस्ङसोसाम्ङ्योस्सुप्’ इत्यनेन सप्तमी-एकवचने ङि आदेशे कृते

ज्ञान्+इ ‘लशक्वतद्धिते’ इत्यनेन ङ् इत्यस्य इत्संज्ञायां ‘तस्य लोपः’ इत्यनेन लोपे

‘आद् गुणः’ इत्यनेन एकारगुणादेशे कृते

ज्ञाने पदसिद्धम्।

## ज्ञानयोः

| | |
|---|---|
| ज्ञान+ओस् | ‘स्वौजसमौट्छष्टाभ्याम्भिस्ङेभ्याम्भ्यस्ङसिभ्याम्भ्यस्ङसोसाम्ङ्योस्सुप्’ इत्यनेन सूत्रेण सप्तमीद्विवचनविवक्षायाम् ओस् प्रत्ययः |
| ज्ञाने+ओस् | ‘ओसि च’ इत्यनेन अकारस्य ए इति आदेशे |
| ज्ञानयोस् | ‘एचोऽयवायावः’ इत्यनेन सूत्रेण अय् आदेशे |
| ज्ञानयोर् | ‘ससजुषो रु’ इत्यनेन सकारस्य स्थाने रु इति आदेशे अनुबन्धलोपे र् कार इति शेषे |
| ज्ञानयोर् | ‘विरामोऽवसानम्’ इत्यनेन अवसानसंज्ञायाम्<br>‘खरवसानयोर्विसर्जनीयः’ इत्यनेन विसर्गादेशे कृते |
| ज्ञानयोः | पदसिद्धम्। |

## ज्ञानेषु

| | |
|---|---|
| ज्ञान्+सुप् | ‘स्वौजसमौट्छष्टाभ्याम्भिस्ङेभ्याम्भ्यस्ङसिभ्याम्भ्यस्ङसोसाम्ङ्योस्सुप्’ इत्यनेन सूत्रेण सप्तमीबहुवचनविवक्षायां सुप् प्रत्ययः |
| ज्ञान+सु | ‘हलन्त्यम्’ इत्यनेन सूत्रेण प् इत्यस्य इत् संज्ञायां ‘तस्य लोपः’ इत्यनेन लोपे |
| ज्ञानेसु | ‘बहुवचने झल्येत्’ इत्यनेन अकारस्य एकारादेशे<br>‘आदेशप्रत्यययोः’ इति सूत्रेण स-कारस्य ष-आदेशे कृते |
| ज्ञानेषु | पदसिद्धम्। |

# सम्बोधन

## हे ज्ञाने

| | |
|---|---|
| ज्ञान+सु | 'एकवचनं सम्बुद्धिः' इति प्रथमायाः सम्बुद्धिसंज्ञा |
| ज्ञान+अम् | 'स्वमोर्नपुंसकात्' इति सु प्रत्यये लोपे, 'अतोऽम्' इति सूत्रेण अमादेशे कृते |
| ज्ञानम् | 'अमिपूर्वः' इति पूर्वरूपैकादेशे कृते |
| | 'एङ्ह्रस्वात्सम्बुद्धेः' इति सूत्रेण म् कारस्य लोपे कृते |
| | सम्बोधनार्थकस्य हे इत्यस्य पूर्वप्रयोगे कृते |
| हे ज्ञान | पदसिद्धम्। |

एवं हे ज्ञाने, हे ज्ञानानि इति रूपद्वयमपि सिद्ध्यति।

# धन्यवादः